संस्कृत वार्ता:

12.09.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· नवदिल्ल्यां नागरिक-उड्डयनविषये द्वितीये एशिया-प्रशान्त-मन्त्रिस्तरीयसम्मेलने प्रधानमन्त्रिणा नरेन्द्रमोदिना भागम् गृहीतम्।

· रक्षामन्त्री राजनाथसिंहः अवदत् यत्, "तरङ्गशक्तेः उद्देश्यं देशस्य सैन्यक्षमतायाः प्रदर्शनं, सहभागिदेशानां मध्ये अन्ताराष्ट्रिय-सहयोगस्य सुदृढीकरणं च अस्ति"

· आयुष्-मन्त्रालयेन तृतीयतमस्य विशिष्टाभियानस्य अन्तर्गतं त्रयोदश-शततोऽधिकाः जनसमस्याः निराकृताः ।

· भारतीय-ऋतुविज्ञान -विभागेन श्वस्तनं यावत् उत्तराखण्ड-प्रदेशे वृष्ट्याः रेड्-अलर्ट् इति रक्तसञ्चेतना घोषिता अस्ति।

· हाकी-क्रीडायां, चीनदेशस्य हुलुन्बुयिर्-नगरे पुरुषाणां एशियन्-हॉकीक्रीडा-चषकस्य प्रतियोगितायां, भारतेन कोरिया-दलं एक-क्रीडनाङ्कं विरुध्य क्रीडनाङ्क-त्रयैः पराजितम् ।

<u>प्रधानमन्त्री-भारतमण्डपम्</u>

नवदिल्ल्याः भारतमण्डपम् इत्यत्र नागरिक-उड्डयनविषये द्वितीये एशिया-प्रशान्त-मन्त्रिस्तरीयसम्मेलने प्रधानमन्त्रिणा नरेन्द्रमोदिना भागम् गृहीतम् । कश्चित् कालानन्तरमेव प्रधानमन्त्री सर्वैः सदस्यराष्ट्रैः सह "दिल्ली-घोषणा" इत्यस्य स्वीकरणाय उद्घोषणं करिष्यति। दिल्ली-घोषणा क्षेत्रस्य , विमानयान-क्षेत्रस्य , उन्नत्यै दूरदर्शी मार्गचित्रम् अस्ति। इतः पूर्वं नागरिक-विमानयान-मन्त्री राममोहन-नायडु-वर्यः ह्यः नवदिल्ल्यां सम्मेलनस्य उद्घाटनम् अकरोत्। श्रीनायडुः नागरिक-विमानयानविषये एशिया-प्रशान्त-मन्त्रीस्तरीय-सम्मेलनस्य अध्यक्षत्वेन निर्वाचितः अभवत्। 2035 तमवर्षपर्यन्तं सार्ध-त्रिशत-कोटि-वार्षिक-यात्रिकान् समायोजयितुं एशिया-प्रशान्त-विमानयान-आधारिकसंरचनायां व्यूहात्मक-निवेशस्य आह्वानम् अकरोत्। 2025 तमवर्षपर्यन्तं विमानयान-कार्यक्षेत्रे महिलानां सहभागित्वं 25 प्रतिशतं यावत् वर्धयितुं भारतस्य लक्ष्यम् अस्ति इति सः अवधानं दत्तवान्।

तरंगशक्तिः

रक्षामंत्री राजनाथसिंहः अद्य अवदत् यत् देशस्य रक्षाक्षेत्रं आत्मनिर्भरभारतस्य नूतन-संकल्पेन सह द्रुतगत्या अग्रे गमिष्यति इति। अद्य राजस्थानस्य जोधपुरे प्रचलितस्य बृहत्तमस्य बहुराष्ट्रियस्य वायु-अभ्यासस्य तरङ्गशक्तेः द्वितीय-चरणे आयोजिते वायु-प्रदर्शनस्य साक्ष्यं स्वीकृत्य मन्त्री अवदत् यत्, "तरङ्गशक्तेः उद्देश्यं देशस्य सैन्यक्षमतायाः प्रदर्शनं, सहभागिदेशानां मध्ये अन्ताराष्ट्रिय-सहयोगस्य सुदृढीकरणं च अस्ति" इति। सः मित्रराष्ट्राणि उद्भूत-वैश्विक-समस्याः अभिलक्ष्य सहभागितां नूतनोन्नतिं प्रति नेतुं आह्वयत्। अभ्यासस्य समये रक्षामंत्री राजनाथसिंहः भारत-रक्षा-उड्डयन-प्रदर्शनी-आईडीएएक्स-24 इत्यस्य उद्घाटनम् अकरोत्। जोधपुर-नगरे आईडीएएक्स इत्यस्य संस्करणस्य उद्देश्यं, भारतीय-विमानयान-उद्योगानां स्वदेशीयकौशलस्य, अदम्यभावनायाश्च प्रदर्शनम् अस्ति।

आयुष मन्त्रालयः

आयुष्-मन्त्रालयेन तृतीयतमस्य विशिष्टाभियानस्य अन्तर्गतं त्रयोदश-शततोऽधिकाः जनसमस्याः निराकृताः। अस्य अभियानस्य उद्देश्यं कार्यस्थले स्वच्छतायाः परिपालनम् अभिवृद्धिः च अस्ति इति मन्त्रालयः अवदत्। मंत्रालयः इदानीं विशेष-अभियानस्य चतुर्थ-चरणस्य कृते सज्जः अस्ति। आगामि-अभियानस्य भागरूपेण, आयुष्-मन्त्रालयः स्वच्छं ,अवकरमुक्तं च भारतं कर्तुं सर्वेभ्यः प्रतिज्ञां ज्ञापयिष्यति।

जितेन्द्रसिहः-भारतमण्डपम्

विज्ञान-प्रौद्योगिकी-राज्यमन्त्री डा. जितेन्द्रसिंहः अद्य अवदत् यत् भारतदेशः जैव-प्रौद्योगिक्याधारितस्य जैवक्रान्तेः रोमाञ्चकर-समये प्रवेशं कुर्वन् अस्ति इति। नवदिल्ल्याः भारतमण्डपम् इत्यत्र ग्लोबल्-बायो-इण्डिया-2024 इति सम्बोधयन् डा. सिंहः अवदत् यत् जैवक्रान्तिः भारतस्य कृते तथैव प्रभावं जनयितुं शक्नोति यथा एकदा पाश्चात्यदेशानां कृते आई.टी-क्रान्तिः आसीत्। ग्लोबल्-बायो-इण्डिया-2024 इत्यस्य विषये मन्त्री अवदत् यत् एतत् मन्त्रालयानां, राज्य-सर्वकाराणां, स्टार्ट-अप्-संस्थानां, शोधकर्तृणां, बायो-क्लस्टर्-संस्थानां, निवेशकानां, अन्ताराष्ट्रिय-संस्थानां, नीति-निर्मातृणां, उद्योगनेतृणां इत्यादीनां विविध-संस्थानां कृते व्यापार-सम्पर्क-मञ्चरूपेण कार्यं करिष्यति इति। त्रिंशततः अधिकदेशानाम् पञ्चशत-तः

अधिकैः प्रदर्शिनीभिः सह, सः आशां प्रकटयति यत् एतत् नवीनकल्पनानां सहभागित्वस्य च निर्माणे साहाय्यं करिष्यति इति।

केरल-राज्य-वित्त-मन्त्रिणां सम्मेलनम्-

केरल-राज्येण अद्य तिरुवनन्तपुरम्-नगरे राष्ट्रस्य राज्य-वित्त-मन्त्रिणां एकदिवसीयं सम्मेलनम् आयोजितम्। तेलङ्गाना-कर्णाटक-पञ्जाब-तमिल्नाडु-राज्यानां मन्त्रिणः सम्मेलनेऽस्मिन् भागं भजितवन्त: । सम्मेलने षोडशतमस्य वित्त-आयोगस्य विषये अपि च केन्द्र-राज्य-सर्वकारयोः वित्तीय-सम्बद्धेषु अन्येषु विषयेषु चर्चा जाता । केरलस्य मुख्यमन्त्री पिनरायी-विजयनः सम्मेलनस्य उद्घाटनं कुर्वन् अवदत् यत्, राज्येण, पञ्चदश-तमं वित्त-आयोगं प्रति स्वकीय ज्ञापनपत्रे, राज्याणां कृते वितरितः करांशः आयस्य पञ्चाशत्-प्रतिशतं यावत् वर्धनीयः इति आग्रहः कृतः आसीत्। सः राज्याणां मध्ये करस्य सन्तुलितं वितरणम् अपि प्रार्थयत्। सः इतोऽपि अकथयत् यत् केन्द्रेण आरोपितः उपकरः अधिभारः च वर्धमानां प्रवृत्तिं दर्शयति यया विभाजकेषु करसमूहेषु राज्याणाम् अंशः सङ्कुचितः अभवत् इति। अस्मिन् सम्मेलने अनेके मन्त्रिणः उपस्थिताः आसन्।

संस्कृतशिक्षकसम्मानिताः

राजस्थानस्थे जगद्गुरु रामानन्दाचार्य-संस्कृत विश्वविद्यालये संस्कृतभाषायाः सम्वर्धनम् अभिलक्ष्य अनेके संस्कृतशिक्षकाः सम्मानिताः । यत्र तिस्रः शिक्षिकाः दश च शिक्षकाः स्वकीये क्षेत्रे नवाचारपुरस्सरं संस्कृतमाध्यमेन शिक्षणाय प्रशिक्षणाय च सम्मानानि अलभन् । अवसरेऽस्मिन् अध्यक्षतां निर्वहता कुलपतिना प्रो॰ रामसेवकदुबे इत्यमुना उक्तं यत् शिक्षकस्य सम्मानपरम्परा प्राथम्येन गुरुशिष्यपरम्परया संस्कृतेनैव संस्थापिता। अस्याः परम्परायाः वाहिका संस्कृतभाषा अस्तीति ।

ऋतुविज्ञानविभागः-उत्तराखण्डः

भारतीय-ऋतुविज्ञान -विभागेन अद्य श्वः च उत्तराखण्ड-प्रदेशे वृष्ट्याः रेड्-अलर्ट् इति रक्तसञ्चेतना घोषिता अस्ति। आकाशवाण्या सह वार्तालापं कुर्वन्, ऋतुविज्ञानविभागस्य वरिष्ठ-वैज्ञानिकः आर्. के. जेनामणिः अवदत् यत् वायव्य-मध्यदेशस्य उपरि वर्षर्तुः क्रमेण उत्तरदिशं प्रति, ईशानदिशं प्रति च गच्छन्ती अस्ति। फलतः उत्तरप्रदेशस्य विभिन्नेषु भागेषु, समीपस्थेषु क्षेत्रेषु च आगामि-दिनद्वये प्रचण्डवृष्टिः भविष्यति।

प्रधानमन्त्री-पैरालम्पिक

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य पेरिस-पैरालम्पिक्-क्रीडायां भागम् भजता भारतीयदलेन सह संवादः कृतः। श्रीमोदी, पदकविजेतृभ्यः प्रतिभागिभ्यः च अस्यां प्रतिष्ठितायां क्रीडास्पर्धायां तेषां प्रदर्शनस्य कृते प्रशंसां कृतवान्। पैरालम्पिक्-क्रीडायां भारतं सप्त सुवर्णपदकानि, नव रजतपदकानि, त्रयोदश कांस्यपदकानि च समेत्य नवविंशति-पदकानि जित्वा स्वस्य सर्वोत्तमं प्रदर्शनम् अकरोत्। क्रीडामन्त्री मन्सुख् माण्डवीया, भारतस्य पैरालम्पिक्-समित्याः अध्यक्षः देवेन्द्र झाझरिया च संवादस्य समये उपस्थिताः आसन्।

हाकी-क्रीडा

हाकी-क्रीडायां, चीनदेशस्य हुलुन्बुयिर्-नगरे पुरुषाणां एशियन्-हॉकीक्रीडा-चषकस्य प्रतियोगितायां, वर्तमानस्य विजेतृदलेन भारतेन कोरिया-दलं एक-क्रीडनाङ्कं विरुध्य क्रीडनाङ्क-त्रयैः पराजित्य क्रमेण चतुर्थं विजयम् अधिगतम् । हरमनप्रीत-सिंहः, अरिजित-सिंहः च भारतस्य कृते क्रीडनाङ्कं समर्जितवन्तौ । इदानीं भारतं शनिवासरे अन्तिमायां शृङ्खला-क्रीडायां स्वकीयेन चिरप्रतिद्वन्द्विना पाकिस्तानेन सह क्रीडाद्वन्द्वं करिष्यति । षट्-दलानाम् इयं प्रतियोगिता राउण्ड-राबिन् इति प्रकारेण क्रीड्यते, यत्र शीर्ष-चत्वारि दलानि सितम्बरस्य षोडश-दिनाङ्के उपान्त्यचक्राय अर्हाणि भविष्यन्ति। अन्तिमा क्रीडा सितम्बरमासस्य सप्तदश-दिनाङ्के भविष्यति।

।। इति वार्ताः।।